तर्कामृतम्

१२२१

प० १२

न्याय

तर्कामृत

३५०

तर्कामृतं ।
१

श्रीगणेशाय नमः श्रीसरस्वत्यै नमः श्रीगुरुभ्यो नमः ब्रह्माद्या निखिलार्चिता खिदंशसंदोहाः सदाभीष्टदाः स्वा
ज्ञानमुद्रामायायत्र मनसो द्वन्द्वीः समस्ता द्रुधः श्रीविश्वेश्वरणांबुजं भवभयध्वंसैकबीजं परं हृत्स्थे विनिधाय तन्नि
न्निरूपमं तर्कामृतं तन्यते १ अथ श्रुतिः श्रूयते आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति
अस्यार्थः मुमुक्षुणात्मा द्रष्टव्यो मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत् आत्मदर्शनोपायः क इत्याह श्रो
तव्य इत्यादि तेनार्थक्रमेण शाब्दक्रमस्त्यक्तो भवति अग्निहोत्रं जुहोति यवागूं पचतीत्यादिवत् तथा च श्रव
णमनननिदिध्यासनानि तत्त्वज्ञानजनकानीत्युक्तं भवति अत्र श्रुतितः कृतात्मश्रवणो मननेऽधिकारी मननं चात्मन स्प८
इतरभिन्नत्वेनानुमानं तच्च भेदप्रतियोगीतरज्ञानसाध्यं तथा चेतरस्वरूपके त इत्थं पदार्थनिरूपणं संक्षेपतः सामान्य
तः पदार्थो द्विविधः भावोऽभावश्च भावः षड्विधः द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् तत्र द्रव्यत्वगुण
त्वकर्मत्वानि जातयः सामान्यत्वादीन्युपाधयः अन्यानि जातयः तत्र रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयो रामः
गविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराश्चतुर्दश गुणाः पृथिव्याः तत्रैव गंधं विहाय स्नेहं विनियोज्य चतुर्दश १

द्रव्याणि नव पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि। आकाशत्वकालत्वदिक्त्वान्युपाधयः २

गुणाजलस्य रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्का·राएकादशगुणातेजसः
स्पर्शसं·ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारानवगुणावायोः शब्दसंख्यापरिमाणपृथक्त्वसं
योगविभागाःषड्गुणाआकाशस्य संख्यापरिमाणपृथक्त्वसंयोगविभागाःपंचगुणाःकालदिशोः संख्यापरि
माणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्दशगुणाआत्मनः संख्यापरिमा
णपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराअष्टौगुणामनसः ज्ञानेच्छाकृतिसंख्यापरिमाणपृथक्त्वसंयोगवि
भागाअष्टौगुणाईश्वरस्य तथाचवायोर्नवैकादशतेजसोगुणाजलक्षितिप्राणभृतांचतुर्दश दिक्कालयोःपंचष
ड्वचांबरेमहेश्वरेष्टौमनसस्तथैवच तत्रपृथिवीजलतेजोवायवोद्विविधाःपरमाणवःसावयवाश्च आकाशका
लात्मदिशोविभुरूपाः मनःपरमाणुरूपं तत्रसावयवाअनित्याइतराणिनित्यानि सावयवाअपित्रिविधाःशा
रीरेंद्रियविषयभेदात् मानुषाणांशरीरंपार्थिवं जलीयंशरीरंवरुणलोकेप्रसिद्धं तेजसंशरीरमादित्यलोके वा
यवीयंशरीरंवायुलोके घ्राणेंद्रियंपार्थिवं रसनेंद्रियंजलीयं चक्षुरिंद्रियंतैजसं त्वगिंद्रियंवायवीयं श्रोत्रेंद्रियं

पं॰

तर्कसृतं
२
2

कर्णशष्कुल्यवच्छिन्नो नभःप्रदेशः एतानि पंचबहिरिंद्रियाणि मनोंतरिंद्रियं तेन षडिंद्रियाणि ध् विषयाश्शरीराद्यादि
रूपेण प्रसिद्धाः आत्माद्विविधः जीवात्मा परमात्मा च तत्र जीवात्मानः प्रतिशरीरं भिन्ना बद्धमोक्षयोग्याः परमा
त्मेश्वरः अथ प्रत्यक्षाप्रत्यक्षद्रव्याणि परमाणुद्व्यणुके अप्रत्यक्षे उद्भूतरूपवत्त्वे यत्र तानि पृथ्वीजलतेजांसि प्र
त्यक्षाणि आत्मा च प्रत्यक्षः वाय्वाकाशकालदिङ्मनांसि त्वप्रत्यक्षाणि बहिर्द्रव्यप्रत्यक्षं प्रति महत्त्वे सत्युद्भूतरूपव
त्त्वं प्रयोजकं अथ द्रव्योत्पत्तिप्रक्रिया तत्रोत्पत्तिः कारणवतो अनन्यथासिद्धकार्यनियतपूर्ववृत्तिकारणं तत्त्वं कार
णत्वं त्रिविधानि कारणानि समवायिकारणासमवायिकारणनिमित्तकारणानि यत्समवेतं कार्यमुत्पद्यते तत्स
मवायिकारणं यथा परमाणुर्द्व्यणुकस्य कपालं घटस्य समवायिकारणे संबद्धं कारणमसमवायिकारणं यथा प
रमाणुद्वयसंयोगो द्व्यणुकस्य कपालरूपं घटरूपस्य एतदुभयभिन्नं कारणं निमित्तकारणं यथा द्व्यणुके ईश्वरः घ
टे दंडः एतत्कारणत्रयं भावकार्यमात्रस्य तत्र समवायिकारणं सर्वत्र द्रव्यमेव असमवायिकारणं द्रव्ये गुणो गुणे गु
णः कर्म च कार्यमात्रं प्रति साधारणानि ईश्वरज्ञानेच्छाकृतयः प्रागभावकालदिगदृष्टानि तत्र परमाणुद्वय तर्क०
२

रणा २ म१

संयोगाद्व्यणुकमुत्पद्यते संयुक्तद्व्यणुकत्रयात्त्रसरेणुः एवं चतुरणुकादिकपालांतं कपालद्वयसंयोगेन घटो जायते घट
त्वं सावयवी अथ द्रव्यप्रमाणं कथ्यते प्रत्यक्षद्रव्ये प्रत्यक्षमेव प्रमाणं अतींद्रियेनुमानं तत्र पक्षहेतुसाध्यदृष्टांतज्ञान
साध्यं विशेषो वक्ष्यते परमाणुद्व्यणुकानुमानं यथा त्रसरेणुः सावयवद्रव्यारब्धो वहिरिंद्रियवेद्यद्रव्यत्वात् बहिरिं
द्रियवेद्यद्रव्यं यत्तत्सावयवद्रव्यारब्धं यथा घटः अत्र त्रसरेणुः पक्षः सावयवद्रव्यारब्धत्वं साध्यं बहिरिंद्रियवेद्यद्रव्य
त्वादिति हेतुः घटो दृष्टांतः अनेन द्व्यणुकं परमाणुश्च सिध्यति आकाशवायू शब्देन स्पर्शेन चानुमीयेते शब्दो द्रव्या
श्रितो गुणत्वात् यथा घटरूपं अनेन द्रव्यांतरबाधाच्छब्दाश्रयत्वेनाकाशं सिध्यति पृथिव्यादित्रयावृत्तिरयं स्पर्शो द्रव्या
श्रितो गुणत्वात् इत्यनुमानेन द्रव्यांतरबाधात्स्पर्शाश्रयत्वेन वायुः सिध्यति कालेप्रमाणं यथा परत्वापरत्वे द्विवि
धे कालिके दैशिके च परत्वोत्पत्तिश्च बहुतररविक्रियाविशिष्टशरीरज्ञानात् अपरोत्पत्तिश्च स्वल्पतररविक्रियावि
शिष्टशरीरज्ञानात् तत्परत्वं ज्येष्ठत्वं अपरत्वं कनिष्ठत्वं तदनुमानं यथा परत्वजनकं बहुतररविक्रियाविशिष्टशरी
रज्ञानमिदं परंपरासंबंधघटकसापेक्षं साक्षात्संबंधाभावे सति विशिष्टज्ञानत्वात् लोहितस्फटिकज्ञानप्रत्ययवत्

तर्कासं०
३
3

परंपरासंबंधश्च रविक्रियायाः स्वसमवायिसंयुक्तसंयोगः तेन संबंधघटकतया कालः सिध्यति ननु कालस्य भूतभ
विष्यद्वर्तमानभेदेन बहुत्वात्कुत एकत्वमिति चेन्न उपाधिभेदेन तद्भेदसंभवात् कालोपाधयो रविक्रियादिरूपा
भिन्ना एव दैशिकपरत्वापरत्वाभ्यां दिशः सिद्धिः तद्दूरत्वसमीपत्वे अवधिसापेक्षं बहुतरसंयोगविशिष्टशरीर
ज्ञानमिदं परत्वजनकं परंपरासंबंधघटकसापेक्षमित्यादि पूर्ववत् तेन च दिशः सिद्धिः न चाकाशमेव संबंधघटक
मास्तामिति वाच्यं तस्य शब्दाश्रयत्वेनैव धर्मिग्राहकप्रमाणसिद्धत्वात् रविक्रियाद्युपनायकत्वासंभवः अहं सु
खी आदिप्रत्यक्षमात्मनि प्रमाणं ईश्वरे चानुमानं यथा क्षितिः सकर्तृका कार्यत्वात् घटवत् तेनेश्वरस्य तद्वति
नित्यज्ञानेच्छाकृतीनां तत्सार्वज्ञस्य च सिद्धिः मनसि त्वनुमानं प्रमाणं तद्यथा सुखादिप्रत्यक्षमिंद्रियजन्यं जन्यप्र
त्यक्षत्वात् घटप्रत्यक्षवत् तथा चेंद्रियांतरबाधे मनसः सिद्धिः अथ द्रव्यनाशप्रक्रिया द्रव्यनाशो द्विविधः क्वचिद
समवायिकारणनाशात् क्वचिदसमवायिकारणनाशाच्च तत्राद्यो यथा परमाणुद्वयसंयोगनाशाद् द्व्यणुकनाशः राम०
द्वितीयो यथा कपालनाशात् घटनाशः घटनाश उभयतः संभवति आकाशकालदिगात्मपरमाणवोऽत ३

यः समवायश्च पृथिव्यादिपंचानांभूतत्वं पृथिवीजलतेजोवायुमनसांक्रियावत्वंमूर्तत्वंच पृथिवीजलतेजोवाय
वोद्रव्यसमवायिकारणानि कालस्यकालिकसंबंधेसर्वाधिकरणत्वं दिशोदैशिकसंबंधेनसर्वाधिकरणत्वं अ
थगुणाः कथ्यंते रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्व संयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेछाद्वेषप्रयत्न
गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिगुणाः अथरूपत्वादीनिसर्वाण्येवजातयः रूपंपृथिव्यादित्र
यवृत्ति तच्चशुक्लनीलरक्तकृष्णपीतचित्रादिभेदेनबहुविधंपृथिवीवृत्ति स्वच्छशुक्लरूपंजलवृत्ति रसःपृथिवी
जलवृत्तिः तत्रमधुराम्ललवणकटुकषायतिक्तभेदेनषड्विधःपृथिव्यां जलेमधुरएवरसः गंधोद्विविधः सुरभि
रसुरभिश्च पृथिवीमात्रवृत्तिः स्पर्शश्चपृथिव्यादिचतुष्टयवृत्तिः सत्रिविधः अनुष्णाशीतः शीतउष्णश्च अनुष्णाशी
तः पृथिवीवाय्वोः जलेशीतः तेजस्युष्णः संख्यापरिमाणपृथक्त्वसंयोगविभागानवद्रव्यवृत्तयः परत्वापरत्वे पृ
थिवीजलतेजोवायुमनोवृत्तिनी बुद्धिसुखदुःखेछाद्वेषप्रयत्नभावनाधर्माधर्माआत्मवृत्तयः गुरुत्वंपृथिवीज
लवृत्ति द्रवत्वंपृथिवीजलतेजोवृत्ति तद्द्विविधं नैमित्तिकंसांसिद्धिकंच आद्यंपृथिवीतेजसोः द्वितीयंजले स्नेहो

सामान्यगुणाः। अथनित्यगुणाः। जलतेजोवायुपरमाणूनां विशेषगुणाः। परमाणुवृत्तिगुरुत्वं स्थितिस्थापकश्च। ६

तर्कामृत० ४ द्वि० वृत्तिः 4

जलमात्रवृत्तिः संस्कारः पृथिवीजलतेजोवाय्वात्ममनोवृत्तिः सत्रिविधः वेगोभावनास्थितिस्थापकश्च तत्र वेगः
पृथिव्यांचतुष्टयंमनोवृत्तिः द्वितीयस्तु आत्ममात्रवृत्तिः तृतीयः पृथिव्यादिचतुष्टयवृत्तिः शब्दोद्विविधः वर्णा
त्मको ध्वन्यात्मकश्च आकाशमात्रे रूपरसगंधस्पर्शस्नेहसांसिद्धिकद्रवत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्र
यत्नधर्माधर्मभावनाविशेषगुणाः तथाचोक्तं रूपंगंधोरसःस्पर्शःस्नेहःसांसिद्धिकोद्रवः बुद्ध्यादिर्भाव
नांतश्चशब्दोवैशेषिकागुणाः १ संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगस्थिति
स्थापकाः विभूनांपरिमाणूनांचैकत्वपरिमाणेकपृथक्त्वानि ईश्वरेच्छाज्ञानकृतयत्नानित्यगुणाः अथाप्रत्य
क्षगुणाः गुरुत्वधर्माधर्मभावनास्थितिस्थापकाः परमाणुद्व्यणुकवृत्तिगुणाः अतींद्रियवृत्तिसामान्यगुणास्त्र
सरेणोरूपंविहायान्येगुणाअतींद्रियाः रूपरसगंधस्पर्शस्नेहप्रत्यक्षेमहत्त्वानित्वे सतिउद्भूतत्वं प्रयोजकं सा
मान्यगुणप्रत्यक्षेआश्रयप्रत्यक्षं बुद्धिप्रत्यक्षेस्ववृत्तिविशिष्टज्ञानत्वं सुखादिप्रत्यक्षेस्ववृत्तिसुखत्वादिक
मेव अंत्याद्यशब्दोविहायसर्वःशब्दःप्रत्यक्षः अथगुणोत्पत्तिप्रक्रिया अवयववृत्तिविशेषगुणाः अवय

राम० ४

तिनैयायिकमतं । अग्निसंयोगेनपरमाणुपाके सतिपरमाणौरक्तरूपमुत्पद्यते ।3

विष्टनिस्वसमानजातीयविशेषगुणानारभंते पृथिवीविशेषगुणाः पाकजास्तुते द्विविधाः पाकप्रयोज्याः पाकज
न्याश्च कारणगुणप्रक्रमजन्याः पाकप्रयोज्याः वह्निसंयोगजन्याद्वितीयाः श्यामघटस्याग्निसंयोगेनश्यामरूपना
शानंतरंघटेरक्तंरूपमुत्पद्यते पुनर्घटोत्पत्तौसत्यांकारणगुणप्रक्रमेणघटे रूपमुत्पद्यते इतिवैशेषिकमतं कपा
लेनीलमेकमेकंचपीतंयदितदाघटेचित्ररूपमुत्पद्यते रसादावेवंसतिअवयविनिरसोनगापत्ते चित्ररसाद्यस्वी
काराद् गुरुत्वस्थितिस्थापकयोश्चकारणगुणप्रक्रमजन्यता द्वित्वादयोपेक्षाबुद्धिजन्याः परिमाणंचतुर्विधं
अणुमहद्दीर्घह्रस्वंचेति कारणगुणप्रक्रमजन्यं स्वावयवबहुत्वंचमहत्वजनकं यथात्रसरेणूनां अवयवानां
शिथिलसंयोगरूपः प्रचयोपित्तज्जनकः यथातूलपरिमाणं पृथक्त्वंकारणगुणप्रक्रमजन्यं ननुतत्रकिंप्रमाणं घ
टात्पटः पृथगितिप्रत्ययस्तु तस्यान्योन्याभावविषयकत्वादितिचेन्न अन्योन्याभावप्रत्ययेअनुयोगिप्रतियोगिनोः
समानविभक्तिकत्वनियमात् यथाघटेनपटःइति अन्योन्याभावस्यपृथक्त्वेरूपत्वे घटात्पटोनेत्यपिप्रयोगापत्तेः नचै
वंघटादन्यः पटःइत्यत्रकथमन्योन्याभावप्रतीतिरितिवाच्यं अन्यत्वस्यापिपृथक्त्वरूपत्वात् संयोगस्त्रिविधः अ
न्यतरकर्मजः उभयकर्मजः संयोगजश्च आद्योयथा मनःकर्मणाआत्ममनसोः संयोगः द्वितीयोयथा मेषयोः क

तर्कामृत ५ 5 र्मणा तयोः संयोगः विभागस्त्रिविधः तृतीयो यथा कारणाकारणसंयोगात्कार्याकार्यसंयोगः यथा हस्ततरुसं
योगात्कायतरुसंयोगः विभागस्त्रिविधः अन्यतरकर्मजः उभयकर्मजः विभागजश्च आद्यो यथा मनःकर्म
णा आत्ममनसोर्विभागः द्वितीयो यथा मेषयोः कर्मणा तयोर्विभागः विभागजविभागो द्विविधः कारण
मात्रविभागजः कारणाकारणविभागजश्च आद्यो यथा कपालकर्मणा कपालद्वयविभागः ततः कपाल
द्वयसंयोगनाशस्ततो घटनाशस्ततः कपालस्याकाशाद्विभागजो विभागः न च विभागः स्वोत्पत्त्यनंतरमेव वि
भागजविभागजननं यत्विति वाच्यं द्रव्यनाशसहकृतस्यैव तस्य तज्जनकत्वात् द्रव्यस्य प्रतिबंधकत्वेन सति द्रव्ये
तदसंभवात् न च कर्मैव एकदा कपालद्वयविभागं आकाशकपालविभागं च जनयत्विति वाच्यं यद्द्रव्यानारं
भकसंयोगविरोधिनं विभागमारभते न तद्द्रव्यारंभकसंयोगविरोधिनं विभागमारभते न तद्द्रव्यारंभकसंयो
गविरोधिनं यथा विकसत्कुड्मलकर्मेति व्याप्तेः न चासंयोगेप्येवं मस्तु तत्राविरोधात् ॥ द्वितीयस्तु का राम. ५
रणाकारणविभागात्कार्याकार्यविभागः करतरुविभागात्कायतरुविभागः परत्वापरत्वोत्पत्तिः कालप्रकर
णे उक्ता बुद्धिर्ज्ञानं तद्द्विविधं स्मरणमनुभवश्च स्मरणं द्विविधं यथार्थमयथार्थं च तद्धनितत्प्रकारकं यथा

र्थं तदभाववति तत्प्रकारकमयथार्थं पूर्वानुभवः संस्कारद्वारा स्मरणं जनयति तत्र पूर्वानुभवस्य यथार्थत्वा
यथार्थत्वाभ्यां स्मरणमुभयरूपं भवति अनुभवो द्विविधः प्रमा अयथार्थश्च तत्र प्रमा चतुर्विधा सा वक्ष्यते ।
अयथार्थज्ञानं चतुर्विधं संशयो विपर्ययः स्वप्नोऽनध्यवसायश्च संशयो यथा समानधर्मवद्धर्मिज्ञानाद्विशेषा
दर्शनादुभयकोटिस्मरणे स्थाणुर्वा पुरुषो वेति ज्ञानं जन्यते स एव विपर्ययस्तु समानधर्मवद्धर्मिज्ञानाद्विशे
षादर्शनादेककोटिस्मरणे शुक्तौ विदं रजतमिति ज्ञानं जन्यते तत्र गुरुमते इदमित्यनुभवात्मकं ज्ञानं रजतमि
ति स्मरणात्मकं तेन ग्रहणस्मरणात्मकं ज्ञानद्वयं न तु रजतत्वविशिष्टज्ञानमिदं अन्यस्यान्यथाभानसामग्र्य
भावात् प्रवृत्तिश्च स्वतंत्रोपस्थितेष्टभेदाग्रहात् नैयायिकमते प्रवर्तकं विशिष्टज्ञानं तेन भ्रमः सिध्यति स्वप्न
स्तु अनुभूतपदार्थस्मरणे सत्यदृष्टेन धातुदोषेण च जन्यते अनध्यवसायश्च किंचिदिति ज्ञानं विशेषादर्शना
द्भवति अत्र यद्ययं निर्वह्निः स्यात्तर्हि निर्धूमः स्यादिति तर्को विपर्ययमध्ये बोध्यः तत्र नैयायिकमते स्वप्नानध्यवसा
यौ विपर्ययमध्ये प्रविष्टौ तेन तन्मते अयथार्थज्ञानं द्विविधं संशयो विपर्ययश्चेति सुखं धर्मजन्यं दुःखमधर्मजन्यं इ
च्छा इष्टसाधनताज्ञानजन्या द्वेषोऽनिष्टसाधनताज्ञानजन्यः कृतिस्त्रिविधा जीवनयोनियत्नरूपा प्रवृत्तिर्निवृत्ति

तर्कोस्मृत.
६
6

त्रिश्च आद्याजीवनादृष्टजन्या द्वितीयेच्छाजन्या तृतीयाद्वेषजन्या धर्मःश्रुतिविहितकर्मजन्यः अधर्मश्रुति
विरुद्धाचरणजन्यः वेगाख्यसंस्कार आद्यक्रियाजन्योद्वितीयादिक्रियाजनकः यथावेगेन बालश्चलति इति भा
वनाख्यःसंस्कारोविशिष्टज्ञानजन्यः स्थितिस्थापकाख्यःकारणगुणप्रक्रमजन्यः गुरुत्वंकारणगुरुत्वजन्यं
नैमित्तिकंद्रवत्वंजतुघृतसुवर्णादीनांअग्निसंयोगजन्यं सांसिद्धिकद्रवत्वंकारणगुणप्रक्रमजन्यं नैमित्तिकंद्र
वत्वंजतुघृतसुवर्णादीनां अग्निसंयोग[illegible]जन्यं सांसिद्धिकद्रवत्वंकारणगुणप्रक्रमजन्यं स्नेहःकार
णगुणप्रक्रमजन्यः शब्दस्त्रिविधः संयोगजोविभागजः शब्दजश्च आद्योभेरीदण्डसंयोगजन्यः द्वितीयोवं
शदलद्वयविभागजन्यः तृतीयस्तुसंयोगेनविभागेनवाआद्यशब्दजनितेनतेनशब्देननिमित्तवायुसहकृतेनवी
चीतरंगन्यायेनकदंबकुसुमन्यायेनवाजन्यते उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानिपंचकर्माणि उ
त्क्षेपणत्वादीनिजातयः पृथिवीजलतेजोवायुमनोवृत्तीनिकर्माणि सर्वाण्यनित्यानि अतींद्रियवृत्तीन्यतीं
द्रियाणि प्रत्यक्षवृत्तीनिप्रत्यक्षाणि अथकर्मोत्पत्तिप्रक्रिया संयोगेननोदनाख्येनाद्यंकर्मजन्यते द्विती
यादिवेगजन्यंक्रिया क्रियातोविभागः विभागात्पूर्वसंयोगनाशस्ततउत्तरदेशसंयोगोत्पत्तिः ततःकर्मवि

राम
६

भागयोर्नाशः सामान्यंत्रिविधं व्यापकंव्याप्यंव्याप्यव्यापकंच व्यापकंसत्ता व्याप्यंघटत्वादि द्रव्यत्वादिव्याप्यव्या
पकंच व्यक्तेरभेदस्तुल्यत्वंसंकरोथानवस्थितिः रूपहानिरसंबंधोजातिबाधकसंग्रहः नित्यत्वेसत्यनेकसमवेत
त्वमितिसामान्यलक्षणं सामान्यानिनित्यान्येव अतींद्रियवृत्तीन्यतींद्रियाणि प्रत्यक्षवृत्तीनिप्रत्यक्षाणि नित्य
द्रव्यवृत्तयेत्याविशेषाः तेचबहवोनित्याअतींद्रियाश्चप्रलयेपरमाणूनांभेदायतेस्वीक्रियंते तेषांवैधर्म्यव्याप्य
त्वादिति स्वसंबंधिभिन्नोनित्यः संबंधःसमवायः तेनस्वरूपसंबंधस्यसंयोगस्यचनिरासः इहघटेघटत्वमिति
प्रतीतिस्तत्रप्रमाणं नैय्यायिकमतेसमवायःप्रत्यक्षःसचनित्यश्च ननुअन्यान्यपिअंधकारसुवर्णादीनिद्रव्या
णिसंतिआलस्यादयोगुणाअपिसंति नथंनवैवेत्यादि मेवं अंधकारोनद्रव्यंकिंतुतेजोभावः सुवर्णतेजएव
आलस्यंकृत्याभावः एवमन्यदपि अभावोद्विविधः संसर्गाभावोन्योन्याभावश्च आद्यस्त्रिविधः प्रागभावोध्वं
सोत्यंताभावश्च प्रागभावोविनाशीअजन्यः ध्वंसोजन्योऽविनाशी अत्यंताभावान्योन्याभावावजन्यावविना
शिनौयोग्यानुपलब्ध्याभावःप्रत्यक्षः अन्यत्रत्वतींद्रियः अथप्रमाकथ्यते साचतुर्विधा प्रत्यक्षानुमित्युपमि
तिशाब्दरूपा तत्करणानिप्रमाणानिचत्वारि प्रत्यक्षानुमानोपमानशब्दभेदात् तत्रप्रत्यक्षंद्विविधं निर्विकल्प

कंसविकल्पकंचेति प्रत्यक्षकरणानिषडिंद्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि एतानिसंनिकर्षमहिम्ना
निप्रत्यक्षंजनयंति संनिकर्षश्चालौकिकोलौकिकश्च अलौकिकस्त्रिविधः ज्ञानलक्षणःसामान्यलक्षणःयोग
जधर्मश्च लौकिकःषड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः स
मवेतसमवायः विशेषणताचेति संयोगेनद्रव्यग्रहः संयुक्तसमवायेनशब्दान्यगुणकर्मद्रव्यवृत्तिजातीनांप्रत्य
क्षं संयुक्तसमवेतसमवायेनशब्दवृत्तिजाती तद्गुणवृत्तिजातिकर्मवृत्तिजाती ॥ नांप्रत्यक्षं समवायेनशब्दस्य
समवेतसमवायेनशब्दवृत्तिजातेः विशेषणतयाऽभावस्यसमवायस्यच अलौकिकःसयथा ज्ञानलक्षणयासु
रभिचंदनमितिचाक्षुषंज्ञानं सामान्यलक्षणयाघटत्वेनरूपेणयावद्घटज्ञानं योगजधर्मेणयोगिनांसर्वज्ञानं
तत्रनिर्विकल्पकंविशिष्टप्रकारादिरहितंवस्तुस्वरूपमात्रज्ञानं सविकल्पकंसप्रकारकं भासमानवैशिष्ट्यप्रतियो
गित्वंचप्रकारत्वं यथा अयंघटइत्यत्रअयंविशेष्यः घटत्वंप्रकारः भासमानवैशिष्ट्यंएतयोः समवायस्त
स्यप्रतियोगिघटत्वं सविकल्पकमेवविशिष्टवैशिष्ट्यज्ञानं यथादंडी अत्रदंडत्वविशिष्टस्यवैशिष्ट्यंपुरुषे
भासते अथप्रक्रिया आदाविंद्रियसंनिकर्षात् घटघटत्वेइतिनिर्विकल्पकं ततोयंघटइतिविशिष्टज्ञानं

तत्र परतःप्रामाण्यग्रह इति नैयायिकाः यथा घट इति व्यवसायः ततो घटमहं जानामीत्यनुव्यवसायः ततः प्रामाण्या
प्रामाण्ये इति कोटिद्वयस्मरणं अथ चतुर्थे इदं ज्ञानं प्रमाणं वा न वेति प्रामाण्यसंशयः ततो विशेषदर्शनानन्तरं प्रामा
ण्यग्रहः इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् ज्ञानान्तरवत् स्वतःप्रामाण्यग्रह इति त्रयो मीमांसकाः तत्र गुरु
मते अयं घट इति ज्ञानं विषयं आत्मानं ज्ञानप्रमाण्यं च गृह्णाति मुरारिमिश्रमते अयं घट इति ज्ञानानन्तरं घटम
हं जानामीत्यनुव्यवसायेनैव प्रामाण्यग्रहः भट्टमते ज्ञानस्यातीन्द्रियत्वेन ज्ञानमनुमेयं यथा तथा भवत्येव प्र
माण्यं यथा अयं घट इति ज्ञानानन्तरं घटे ज्ञाततोत्पद्यते ततो ज्ञातो घटो मया इति ज्ञाततायाः प्रत्यक्षं ततो व्याप्त्या
दिप्रत्यक्षानन्तरं ज्ञानानुमानं यथा अहं घटत्वप्रकारकज्ञानवान् घटत्वप्रकारकज्ञाततावत्त्वात् तावतैव तस्य
धर्मधर्मिविषयकत्वेन प्रामाण्यानुमानं इति प्रत्यक्षं ॥ ॥ ॥ अनुमितिकरणं अनुमानं अनुमिति
त्वं च जातिः व्यापारवत्कारणं करणं व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः हेतुज्ञानादिकं करणं परामर्शो व्या
पारः परामर्शश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानं यथा वह्निव्याप्यधूमवानयमिति आदौ महानसादौ धूमवह्नि
सामानाधिकरण्यग्रहे सति धूमो वह्निव्याप्य इत्यनुभवो जायते ततः कालान्तरे पर्वते धूमे दृष्टे सति व्याप्तिस्म

तर्क० सं०

8

स्मरणं ततश्च विशिष्टवैशिष्ट्यज्ञानं वह्निव्याप्यधूमवानयमिति तृतीयलिंगपरामर्शः पक्षतासहितेन तेन पर्वतो
वह्निमानित्यनुमितिर्जन्यते व्याप्तिश्च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं न चायं
संयोगवान् द्रव्यत्वादित्यत्राव्याप्तिः प्रतियोग्यधिकरणहेतुसामानाधिकरण्यात्यन्ताभावाप्रतियोगिसाध्य
सामानाधिकरण्यमित्यर्थात् पक्षता च सिषाधयिषाविरहसहकृतसिद्ध्यभावः अनुमानं द्विविधं स्वार्थं परा
र्थं च परार्थं पंचावयवसाध्यं अवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पर्वतो वह्निमान् धूमात्
यत्र यत्र वह्निर्धूमस्तत्र तत्र यथा महानसः वह्निव्याप्यधूमवानयं तस्माद्वह्निमान् स्वार्थं तु स्वीयव्याप्त्यादिज्ञानसा
ध्यं न तत्र परप्रतीत्यर्थमिव वाक्यस्य शब्दप्रयोगः तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेकिभेदात् यत्र साध्य
व्यतिरेको न कुत्राप्यस्ति स केवलान्वयी यथा घटोभिधेयः प्रमेयत्वात् इत्यत्र अभिधेयत्वस्य साध्यस्य व्यतिरेकाप्र
सिद्धेः यत्र साध्यप्रसिद्धिः पक्षातिरिक्ते नास्ति स केवलव्यतिरेकी यथा पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात् यत्र
यत्र इतरभेदाभावः तत्र तत्र पृथिवीत्वाभावः यथा जलादि व्यतिरेकव्याप्तौ तु साध्याभावो व्याप्यः हेत्वभावो व्याप ८
कः सोन्वयव्यतिरेकी अत्र साध्यसाध्याभावश्चान्यत्र प्रसिद्धः यथा पर्वतो वह्निमान् धूमवत्त्वादिति अन्वयव्या

तिरेकिणि हेतौ अवश्यं पंचरूपोपपन्नता अपेक्षणीया पक्षसत्त्वं सपक्षसत्त्वं विपक्षव्यावृत्तत्वम् अबाधितत्वम् असत्प्र
तिपक्षत्वं पंचरूपाणि केवलान्वयिनि विपक्षव्यावृत्तत्वरहितं केवलव्यतिरेकिणि सपक्षसत्त्वरहितं चतूरूपमेव
अपेक्षितं यत्र साध्यसंदेहः पक्षः यत्र साध्यनिश्चयः स सपक्षः यत्र साध्याभावनिश्चयः स विपक्षः साध्याभाव
वान्पक्षो बाधः साध्यविरोधिसाधको हेतुः सत्प्रतिपक्षः सोपाधौ पक्षसत्त्वाद्यननमभंग आवश्यकः सोपा
धिश्च व्यभिचारितासंबंधेन उपाधिविशिष्टः उपाधिश्च त्रिविधः साधनाव्यापकत्वे सति शुद्धसाध्यव्यापकः
साधनाव्यापकत्वे सति पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकश्च।
आद्यो यथा अयोगोलकं धूमवद्वह्नेः आर्द्रेंधनप्रभववह्निमत्त्वमुपाधिः साधनाव्यापकत्वे सति शुद्धसाध्यव्याप
कत्वं द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् अत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य साध्यस्य व्यापक
मुद्भूतरूपवत्त्वमुपाधिः तृतीयो यथा ध्वंसो विनाशी जन्यत्वात् अत्र जन्यत्वावच्छिन्नविनाशित्वव्यापकं भावत्वमु
पाधिः अथ हेत्वाभासाः कथ्यंते सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः सव्यभिचार
स्त्रिविधः साधारणासाधारण्यानुपसंहारिभेदात् साध्याभाववद्वृत्तित्वं साधारणत्वं यथा धूमवद्वह्नेः स

तर्कसंग्र· सकलसपक्षव्यावृत्तत्वमसाधारणत्वं यथापर्वतोवह्निमान्पर्वतत्वात् सर्वपक्षकत्वमनुपसंहारित्वं यथासर्वंप्र
मेयंअभिधेयत्वात् साध्याभावव्याप्तोहेतुर्विरुद्धः यथा घटोनित्यःसावयवत्वात् साध्याभावसाधकंहेत्वंतरं
१ यस्यससत्प्रतिपक्षः यथापर्वतोवह्निमान् धूमात् पर्वतोवह्न्यभाववान् महानसान्यत्वात् असिद्धस्त्रिवि
धः आश्रयासिद्धःस्वरूपासिद्धोव्याप्यत्वासिद्धश्चेति यत्रपक्षोसन् सिद्धसाधनेवासआश्रयासिद्धः यथा
9 शशविषाणंनित्यमजन्यत्वात् शरीरंहस्तादिमत्वस्मात्हिमवत्तयावर्तमानत्वात् यत्रपक्षावृत्तिर्हेतुःसस्वरू
पासिद्धः यथापर्वतोवह्निमान्महानसत्वात् सर्वविशेषणासिद्धविशेष्यासिद्धभागासिद्धभेदादनेकविधः
आद्योयथा शब्दोअनित्यश्चाक्षुषत्वेसतिजन्यत्वात् द्वितीयोयथा शब्दोनित्यःगुणत्वेसतिपरमाणुवृत्तित्वा
त् तृतीयोयथा एतानिद्रव्याणिनिरवयवत्वात् बाधोयथा जलह्रदोवह्निमान्द्रव्यत्वात् तेनैतद्दोषरहि
तोहेतुःसद्धेतुः इत्यनुमाने ॥ ॥ श्री ॥ अपमितिकरणमुपमानं कीदृशोगवय इतिप्रश्नेगोसदृ राम०
शोगवयइत्युत्तरितेगोसदृशंप्राणिनंपश्यति तदाहवोक्तवाक्यार्थस्मरणानंतरंअयंगवयपदवाच्यइतिज्ञा
क्रियतेः सोपमितिः इत्युपमाने ॥ ॥ आप्तोक्तःशब्दःप्रमाणं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवानाप्तः १

पदज्ञानंकरणंपदार्थोपस्थितिर्व्यापारः आकांक्षायोग्यतासत्तिज्ञानानिसहकारीणि फलंशाब्दबोधः
स्वरूपयोग्यत्वेसत्यजनितान्वयबोधजनकत्वमाकांक्षा तेनघटःकर्मत्वमानयनंकृतिरित्यत्रनान्वयबोधः पुत्रेण
जनितान्वयबोधत्वात् बाधकं अयमेतिपुत्रोराज्ञःपुरुषोपसार्यता मित्यत्रराज्ञः पुरुषइतिनान्वयबोधः पुत्रे
णजनितान्वयबोधत्वात् बाधकप्रमाविरहोयोग्यता तेनवह्निनासिंचतीत्यत्रनान्वयबोधः अयोग्यत्वात् अव्यवधा
नेनान्वयप्रतियोग्युपस्थितिरासत्तिः तेनगिरिर्भुक्तंवह्निमान्देवदत्तेनेत्यत्रनान्वयबोधः तत्तदर्थप्रतीतीच्छयो
च्चरितत्वंतात्पर्यं तेनभोजनप्रकरणेसैंधवमानयेत्युक्तेअश्वान्वयबोधोनभवति वृत्त्याविनाशब्देननान्वयबोधो
जन्यते वृत्तिर्द्विविधा शक्तिर्लक्षणाच शक्तिर्घटादिपदस्यघटादौलक्षणायथा गंगायांघोषःप्रतिवसतीति
अत्रगंगापदार्थप्रवाहेघोषवासान्वयानुपपत्त्यागंगाशब्दस्यतीरेलक्षणाकल्प्यते तयात्रोपस्थितेनतीरेघोषः
प्रतिवसतीत्यन्वयबोधोभवति गौणीवृत्तिरपिलक्षणैव यथाअग्निर्माणवकोगौर्वाहीकः अत्रलक्षणयाऽ
ग्न्यादिसादृश्यंप्रतीयते शक्तंपदं तच्चतुर्विधं यौगिकं रूढं योगरूढं यौगिकरूढं आद्यंयथा पाचकादिपदं
योग्यार्थेनपाककर्तरिवाचकं द्वितीयंयथा विप्रादिपदंरूढंब्राह्मणवाचकं तृतीयंयथा पंकजादिपदंयोगरू

घ्यापंकजनिकर्तृत्वेन पंकजत्वेन पद्मत्वेन च पद्मवाचकं चतुर्थं यथा उद्भिदसहंयौगिकं अंकुरवाचकं रूढ्यागवि
लक्षणाद्विविधा जहत्स्वार्था अजहत्स्वार्था च आद्याच गंगायां घोष इत्यादौ द्वितीया यथा सर्वैश्छत्रिणो ग
च्छंती त्यादौ अत्र छत्रिणस्तदितरस्यापि च मनान्वयः अथ शाब्दबोधप्रक्रिया देवदत्तो ग्रामं गच्छती त्यत्र ग्राम
कर्मकगमनजनकवर्तमान [illegible] कृतिमानित्यन्वयबोधः द्वितीयायार्थः कर्मत्वं धातोर्गमनं जन
कत्वं संसर्गमर्यादया लब्धं लटो वर्तमानत्वं आख्यातस्य कृतिस्तत्संबंधः संसर्गमर्यादया लभ्यः प्रत्येकतेरिक
तेर्बोधः तत्राख्यातस्य व्यापार इत्यौ लक्षणा यथा रथो गच्छती त्यादौ गमनजनकवर्तमानव्यापारवान्रथः
दधिपश्येत्यादौ द्वितीयालोपस्थले दधिशब्द एवाजहत्स्वार्थलक्षणया दधिकर्मत्वं चोपस्थापयति एकव
चनाद्युपस्थितमेकत्वादि सर्वत्र प्रथमांतपदोपस्थाप्ये अन्वेति देवदत्तेन गम्यते ग्राम इत्यस्य देवदत्तवृत्तिकृ
तिजन्यगमनजन्यफलशाली ग्राम इत्यर्थः वृत्तित्वं संसर्गवल्लभ्यं तृतीयायाश्च कृतिः जन्यत्वं संसर्गः ग
मनं धात्वर्थः जन्यत्वं संसर्गः फलं कर्मण्यात्मनेपदार्थः शालित्वं संसर्गः भावप्रत्यये तु देवदत्तेन सुप्यते इ
त्यस्य देवदत्तवृत्तिकृतिजन्यः स्वाप इत्यर्थः भावप्रत्ययस्थले फलाभावात् आत्मनेपदार्थो न भासते भविष्य

त्वं लृटोऽर्थः तच्च विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वं तेनागमिष्यतीभीत्यत्र विद्यमानप्रागभावप्रतियो
ग्युत्पत्तिकागमनानुकूलकृतिमानित्यर्थः लुटोऽर्थः अनद्यतनत्वमपि लुङोऽर्थः उत्पत्तिभूतत्वं च भूतत्वमती
तत्वं तच्चोत्पत्तानन्वेति तथा च विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वं लब्धं लिटोऽपि परोक्षत्वमतीतत्वं चार्थः
तदन्वयः स्वर्वडुत्पत्तौ लङो अनद्यतनत्वमतीतत्वं चार्थः विधिलिङोऽर्थः कृतिसाध्यत्वे सति बलवदनिष्टाज
नकेष्टसाधनत्वं स्वर्गकामो यजेतेत्यादौ कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनयागकः स्वर्गकाम इत्यर्थः
आशीर्लिङ्लोटोरित्यर्थः वक्त्रिच्छाविषयत्वं तेन घटमानयेत्यत्र घटकर्मकमदिच्छाविषयानयनानुकूलकृति
मांस्त्वमित्यन्वयः व्याप्यक्रियया व्यापका या आपादानं लृङोऽर्थः तात्पर्यविशात्क्वाचिद्भूतत्वं क्वचिद्भविष्यत्वं लृङा
बोध्यते सनः कर्तुरिच्छार्थः सनुत्तराख्यातस्य आश्रयत्वे लक्षणा सविषयार्थकप्रकृतिकाख्यातस्य लक्षणा
या आश्रयत्वे घटं जानातीत्यादौ तथात्वात् यङोऽर्थः पौनःपुन्यं तत्वं च तदानीं तन प्रकृत्यर्थसजातीयक्रियान्तर
ध्वंसकालीनत्वे सति वर्तमानादिकृतिविषयत्वं पापच्यत इत्यादौ तादृशकालीनत्वमेव यङप्रत्ययान्ते आख्या
तस्य चरमत्वावाचकत्वात् नाविशिष्टवाचकत्वं यङः तदानींतनत्वं च स्थूलकालमादाय सर्वकालीनत्वं कर्ता

तर्कामृत.

११

क्त्वार्थः पूर्वत्वं च संनिहितक्रियापेक्षया बोध्यं तत्सर्वकालीनत्वं तत्प्रागभावकालवृत्तित्वं तदुत्पत्तिकालीनध्वंस
प्रतियोगिकालवृत्तित्वं तेन भुक्त्वा व्रजतीत्यत्र गमनप्रागभावावच्छिन्नकालवृत्तिभोजनकर्त्रभिन्नो व्रजतीत्यर्थः समा
नविभक्तिकत्वाभेदेन धर्मिवाचकत्वात् अव्ययत्वेन क्त्वापरविभक्तिलोपात् कालस्य पर्यवसानत्वव्यवहिताव्यवहि
तसाधारणो बोध्यः तेन सर्वस्मिन्देशे गत्वा अस्मिन्देशे आगत इत्यत्र नादृशप्रयोगावगमः इच्छावान् तुमुनोर्थः
भोक्तुं व्रजतीत्यत्र भोजनेच्छावान्व्रजतीत्यर्थः भोक्तुमिच्छतीत्यत्र कर्त्तरिलक्षणा भोजनकर्त्तारमात्मानमिच्छतीत्यर्थः
सविशेषणेहीतिन्यायात् विशेषणेक्तताविच्छान्वयः प्रकृतधात्वर्थकर्त्ताशतृशानचोः धात्वर्थजन्यफलवान्
कर्मशानचोर्थः शत्रादीनां कर्त्ता वाच्यः सविषयप्रकृतिकानां तु आश्रयेलक्षणा एवं कर्तृकर्मकृतां तेन रूपेणक
र्तृकर्मत्ववाच्यं भावकृतां तु ल्युड्घञादीनां साधकत्वमात्रं धात्वर्थातिरिक्तस्य भावकृता नुपस्थानात् ननु नी
लं घटमानयेत्यादौ द्वितीयाद्वयश्रवणात् कर्मद्वयबोधापत्तिः ननु विशिष्टस्य कर्मत्वमिति चेत् न तत्र विशेष
णविभक्तिः साधुत्वाय अथवा विशेषणविभक्तेरभेदोर्थः आद्येयं विशेषः द्वितीयपक्षे वाक्यसमासयोः पर्या
यता न घटे वाक्ये नीलं घटमित्यादौ अभेदस्य पदार्थत्वेन प्रकारत्वात् न संसर्गत्वं नीलघटमित्यादौ कर्मधार

राम.

११

येलक्षणायाअस्वीकारेणाभेदस्यअपदार्थत्वेनसंसर्गत्वात् तथाच वाक्यसमासयोः पर्यायतानुरोधेनषष्ठीसमा
सेराजपुरुषइत्यादौ षष्ठ्यर्थसंबंधलक्षणानघटने संबंधस्यसंसर्गमर्यादयालभ्यत्वात् वस्तुतस्तुविरुद्धविभक्त्य
नवरुद्धस्याभेदबोधकत्वंमुमते मुख्यार्थराजाभेदस्यबाधनेराजपदस्यराजसंबंधिनिलक्षणा एवंबहुव्रीहौ
चरमपदस्यान्यपदार्थेलक्षणा तथा चद्वंद्वकर्म[illegible]धारयान्यसमासे तत्तदर्थेलक्षणा एवंनञोर्थोभावः अघ
टोभूतलमित्यादौ घटभिन्नेलक्षणा नकलंजंभक्षयेदित्यादौ बलवदनिष्टजनकेलक्षणा क्रियासंगतस्यैव
कार[illegible]स्यासंतायोगव्यवच्छेदो[illegible]र्थः यथानीलंसरोजंभवत्येव विशेषणसंगतस्यायोगव्यवच्छेदः यथाशंखः च
पांडुरएवेति विशेष्यसंगतस्यान्ययोगव्यवच्छेदः पार्थएवधनुर्धरइत्यादौ एवंदिशासर्वंबोध्यमिति ॥
इतिजगदीशभट्टाचार्यविरचितंतर्कामृतंसंपूर्णं ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ रामायनमः ॥ ॥